# Maulana Azad College

Department of Sanskrit

Question Bank of Semester-5

DSE -2

क) व्याख्या कार्या।

१.शरदिन्दुसुन्दररुचिश्चेतसि सा मे गिरां देवी।

अपहृत्य तमः सन्ततमर्थानखिलान् प्रकाशयतु।।

२.चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि।

काव्यादेव यतस्तेन तत्स्वरूपं निरूप्यते।।

३.धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च।

करोति कीर्तिं प्रीतिञ्च साधुकाव्यनिषेवणम्।।

४.कटुकौषधोपशमनीयस्य रोगस्य सितशर्करोपशमनीयत्वे कस्य वा रोगिणः सितशर्कराप्रवृत्तिः साधीयसी न स्यात्।

५.श्रुतिदुष्टादयो दोषा अनित्या ये च दर्शिताः।

ध्वन्यात्मन्येव शृङ्गारे ते हेया इत्युदाहृताः।।

६.कीटानुविद्धरत्नादि साधारण्येन काव्यता।

दुष्टेष्वपि मता यत्र रसाद्यनुगमः स्फुटः।।

७.अदोषं गुणवत् काव्यमलङ्कारैरलङ्कृतम्।

रसान्वितं कविः कुर्वन् कीर्तिं प्रीतिञ्च च विन्दति।।

८.वाक्यं स्याद् योग्यताकाङ्क्षासक्तियुक्तः पदोच्चयः।

९. वाच्योर्थोभिधया वोध्यो लक्ष्यो लक्षणया मतः।

व्यङ्ग्यो व्यञ्जनया ताः स्युस्तिस्रः शव्दस्य शक्तयः।।

१०.मुख्यार्थवाधे तद्युक्तो ययान्योर्थः प्रतीयते।

रूढेः प्रयोजनाद्वासौ लक्षणा शक्तिरर्पिता।।

११.मुख्यार्थस्येतराक्षेपो वाक्यार्थेन्वयसिद्धये।

स्यादत्मनोप्युपादानादेषोपादानलक्षणा।।

१२.विषयस्यानिगीर्णस्यान्यतादात्म्यप्रतीतिकृत्।

सारोपा स्यान्निगीर्णस्य मता साध्यवसानिका।।

१३.विरतास्वभिधाद्यासु ययार्थो वोध्यतेपरः।

सा वृत्तिर्व्यञ्जना नाम शव्दस्यार्थादिकस्य च।।

१४.अनेकार्थस्य शव्दस्य संयोगाद्यैर्नियन्त्रिते।

एकत्रार्थेन्यधीहेतुर्व्यञ्जना साभिधाश्रया।।

१५.लक्षणोपास्यते यस्य कृते तत्तु प्रयोजनम्।

यया प्रत्याय्यते सा स्याद् व्यञ्जना लक्षणाश्रया।।

१६.शब्दबोध्यो व्यनक्त्यर्थः शब्दोप्यर्थान्तराश्रयः।

एकस्य व्यञ्जकत्वे तदन्यस्य सहकारिता।।

१७.विभावेनानुभावेन व्यक्तः संचारिणा तथा।

रसतामेति रत्यादिःस्थायिभावः सचेतसाम्।।

१८.त्यागी कृती कुलीनः सुश्रीको रूपयौवनोत्साही।

दक्षोनुरक्तलोकस्तेजोवैदग्ध्यशीलवान्नेता।।

१९.रत्यादिज्ञानतादात्म्यादेव यस्माद्रसो भवेत्।

ततोस्य स्वप्रकाशत्वमखण्डत्वं च सिध्यति।।

२०.शृङ्गार-हास्य-करुण-रौद्र-वीर-भयानकाः।

बीभत्सोदभुत इत्यष्टौ रसाः शांतस्तथा मतः।।

## ख. वृहत्प्रश्नाः।

१.आचार्यविश्वनाथानुसारं काव्यलक्षणं प्रतिपादयत।

२.विश्वनाथमतानुसारेण काव्यप्रयोजनं निरूपयत।

३. शृंगाररसस्य लक्षणोदाहरणम् निरूपयत।

४.हास्यरसस्य लक्षणोदाहरणम् निरूपयत।

५.करुणरसस्य लक्षणोदाहरणं लिखत।

६.रौद्ररसस्य लक्षणोदाहरणम् लिखत।

७.विश्वनाथमतानुसारेण  वाकस्य स्वरूपम् निरूपणीयम्।

८.वीभत्सरसस्य लक्षणोदाहरणं लिखत।

९.विश्वनाथमतानुसारेण नायिका कतिविधा ? संक्षेपेण लेखनीयम्।

१०.लक्षणा कतिविधा ? संक्षेपेण लेखनीयम्।